श्रीगणेशायनमः ॥ हरिः ॐ ॥ पंचसंवत्सरमयंयुगाध्यक्षंप्रजापतिं ॥ दिनर्त्वयनमासांगंप्रण
म्यशिरसाशुचिः ॥१॥ प्रणम्यशिरसाकालमभिवाद्यसरस्वतीं ॥ कालज्ञानंप्रवक्ष्यामिलगध
स्यमहात्मनः ॥२॥ ज्योतिषामयनंकृत्स्नंप्रवक्ष्याम्यनुपूर्वशः ॥ विप्राणांसंमतंलोकेयज्ञका
लार्थसिद्धये ॥३॥ निरेकंद्वादशार्धाब्दंद्विगुणंगतसंज्ञिकं ॥ षष्ट्याषष्ट्यायुतंद्वाभ्यांपर्वणांरा
शिरुच्यते ॥४॥ स्वराक्रमेतेसोमार्कौयदासाकंसवासवौ ॥ स्यात्तदादियुगंमाघः तपः शुक्लो
ऽयनंह्युदक् ॥५॥ प्रपद्येतेश्रविष्ठादौसूर्याचंद्रमसावुदक् ॥ सार्पार्धेदक्षिणार्कस्तुमाघश्रावण
योःसदा ॥६॥ घर्मवृद्धिरपांप्रस्थः क्षपाह्रासउदग्गतौ ॥ दक्षिणेतौविपर्यस्तौषण्मुहूर्त्ययनेनतु ॥
॥७॥ द्विगुणंसप्तमंचाहुरयनाद्यंत्रयोदश ॥ चतुर्थंदशमंचैवद्वियुग्माद्यंबहुलेप्यृतौ ॥८॥

वसुस्त्वष्टाभगोजश्चमित्रःसर्पाश्विनौजलं ॥ धाताकश्चायनाद्याश्च्यार्द्धपंचनक्षत्रस्त्वृतुः ॥९॥
भांशास्युरष्टकाःकार्याःपक्षाद्वादशचोद्गताः ॥ एकादशगुणस्त्वोनःशुक्लेर्धंचैंदवायदि ॥
॥१०॥ कार्याभांशाष्टकास्थानेकलाएकान्नविंशतिः ॥ ऊनस्थानेद्विसप्ततीरुद्वपेदूनसंमि
ताः ॥११॥ त्र्यंशंभशेषोदिवसात्सभागःश्चतुर्दशस्याप्युपनीतभिन्नं ॥ भार्धेऽधिकेचा
पु धिगतेपरेंशेद्वांनमेकंनवकेरवेदे ॥१२॥ पक्षात्पंचदशाच्चोर्ध्वंतद्भुक्तमितिनिर्दिशेत् ॥
नवभिस्तूद्भूतोंशःस्याद्द्वादशाद्यधिकेनतु ॥१३॥ जौद्राघःखेश्वेहीरोषाचिन्मूषण्यःसोमा
धानः ॥ रेमृधाश्वाआपोजःस्कृद्वाहृर्येषाद्धातृत्स्वाप्तालिंगैः ॥१४॥ जावाद्यंशैःसमंविद्यात्पूर्वार्धे
पार्वसुत्तरे ॥ ष्टादानांशाश्चतुर्दशीकाष्ठानांद्विनाकलाः ॥१५॥ कलादशचवि

त्रा स्याद्द्विमुहूर्तस्तु नाडिके ॥ द्वित्रिंशत्तत्कलानां तु षट्शती त्र्यधिकं भवेत् ॥ २६ ॥ नाडिके
द्विमुहूर्तस्तु पंचाशत्पलमाषकं ॥ माषकात्कुंभको द्रोणः कुटपैर्वर्धते त्रिभिः ॥ २७ ॥ ससप्त
कं भयुक्सोमः सूर्यो द्यानि त्रयोदश ॥ नवमानि च पंचाह्नः काष्ठाः पंचाक्षराः स्मृताः ॥ १८ ॥
श्रविष्ठाभ्यां गुणाभ्यस्तान्प्राग्विलग्नान्विनिर्दिशेत् ॥ सूर्यान्मासान्षळभ्यस्तान्विद्याच्चां
द्रमसानृतून् ॥ १९ ॥ अतीतपर्वभागेषु शोधयेद्द्विगुणां तिथिं ॥ तेषु मंडलभागेषु तिथि
निष्ठांगतो रविः ॥ २० ॥ याः पर्वभादानकलास्तासु सप्तगुणां तिथिं ॥ प्रक्षिपेत्कलास
मूहस्तु विद्यादादानकीः कलाः ॥ २१ ॥ यदुत्तरस्यायनतोयनं स्याच्छेषं तु यद्दक्षिणतोय
नस्य ॥ तदेव षष्ट्याद्विगुणं विभक्तं सद्वादशं स्याद्दिवसप्रमाणं ॥ २२ ॥ तदर्धं दिनभा

गानां सदा पर्वणि पर्वणि ॥ ऋतुशेषं तु तद्विद्यात्संख्याय सह पर्वणां ॥ २३ ॥ इत्युपायसमुद्दे
शो भूयोप्यह्नः प्रकल्पयेत् ॥ ज्ञेयराशिं गताभ्यस्तं विभजेज्ज्ञानराशिना ॥ २४ ॥ अग्निः प्रजापतिः
सोमो रुद्रोदितिर्बृहस्पतिः ॥ सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च ॥ २५ ॥ ५ ॥ सविता त्व
ष्टाथ वायुश्चेंद्राग्नी मित्र एव च ॥ २६ ॥ इंद्रो निरृती रापो वै विश्वेदेवास्तथैव च ॥ २६ ॥ विष्णु
र्वसवो वरुणोजएकपात्तथैव च ॥ अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम एव च ॥ २७ ॥ नक्षत्रदे
वता एता एताभिर्यज्ञकर्मणि ॥ यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतं ॥ २८ ॥ इत्येतन्मा
सवर्षाणां मुहूर्तोदयपर्वणां ॥ दिनर्त्वयनमासांगं व्याख्यातं लगधोब्रवीत् ॥ २९ ॥ सो
मसूर्यस्तृचरितं लोकं लोके च संमितं ॥ सोमसूर्यस्तृचरितं विद्वान्वेदविदश्नु

२

ते॥३०॥१८॥ विषुवंतद्गुणं द्वाभ्यां रूपहीनं तु षड्गुणं॥ यल्लब्धं तानि पर्वाणि तथोर्ध्वं सा तिथि

र्भवेत्॥ ३१॥ माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः॥ युगस्य पंचवर्षाणि कालज्ञानं प्र

चक्षते॥ ३२॥ तृतीयां नवमीं चैव पौर्णमासीं त्रयोदशीं॥ षष्ठीं च विषुवान्प्रोक्तो द्वादश्यां

च समं भवेत्॥ ३३॥ चतुर्दशीमुपवसथस्तथा भवयतोदितो दिनमुपैति चंद्रमाः॥ मा

घशुक्लाह्निको युंक्ते श्रविष्ठायां च वार्षिकीं॥ ३४॥ यथा शिखा मयूराणां नागानां मण हि ५

यो यथा॥ तद्वद्वेदांगशास्त्राणां ज्योतिषं मूर्ध्नि स्थितं॥ ३५॥ वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानु

पूर्वा विहिताश्च यज्ञाः॥ तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्ज्यो

तिर्विदस्यवेत्तानीति॥ ३८॥ पंचसंवत्सरमयपंचेनकपर्वः कलादयो मासः पर्व सविता विषुवं तत्त्॥ ॐ राम

वै

अथज्योतिषप्रारंभः ॥ श्रीरामचंद्र ॥

[illegible]